नं० ४८३३

नाम- रुद्रयामलतंत्रे भवानी पञ्चाङ्गम्

कर्त्ता- x

पत्र सं०- ४२ पत्राणि सं० x

विषयः- तंत्रम्

भवानीपंचांगम्

रुद्रयामले

४८२२



भ॰ पं॰ १

ॐ श्रीगणेशाय नमः ॐ नमो भवान्यै ॐ
कैलासाचलकूटस्थं देवदेवं महेश्वरं चंद्रा
र्धमौलिङ्गनदीनीरंजितजटाधरं हिमकुंदे
न्दुधवलं सूर्येन्दुदहनेक्षणं पन्नगाभर
णोपेतं मुंडमालाविभूषितं गजचर्मपरी
धानं भस्मभूषितवक्षसं त्रिशूलखट्वांग
धरं वृषभासनसंस्थितं जपंतं मनसा किं
चिद्ध्यानोन्मीलितलोचनं एकाकिनं परं शां
तं दृष्ट्वा स्मेरमुखं विभुं जगत् पार्वती प्रणताना भू
त्वा बद्धांजलिपुटैस्ततः वचनं मधुरं देवी ज
गाद परमेश्वरम् श्रीदेव्युवाच भगवंस्त्व
परो देवस्त्रैलोक्यप्रभुरीश्वरः अणिमाद्य
ष्टसिद्धीनां निर्वाणपदकारणं वेदकर्त्ता

चनेत्रत्रोमेघ्राणोमेत्रशूलमः ब्रह्माद्यता
दिदेवानामादिदेवोजगत्पतिः त्वमेवस्र
ष्टिकर्ताभोत्वंजगत्पालनेरतः त्वमेवसं
हारकर्तासित्रैलोक्यनिधिर्भवैत् किंरुस्य
मन्त्रस्यकिंजपस्यचेद्द्योवदं पतन्मेसं
शयंछिंधियदिप्रीतिर्मयितेदया श्रीभैरव
उवाच शृणुदेविप्रवक्ष्यामिरहस्यंसर्वका
मदं गुह्याद्गुह्यतमंदेविनप्रकाश्यंकदा
चन देवदेवमहेशानीयाभवानीनिवि
क्रमा पराशक्तिश्चिद्रूपासदसद्रूपरा
जिता गुणातीताजगद्धात्रीनिराकाराम
नोमयी आधारभूताजगतांदेवासुरनम
स्कृता सैषासृजतिभूतानिसैवरक्षतिस

आ.भ.
पं.
२

वैरा सैव संहर्ता तेषां ते त्रिजगत्सृष्टा सृष्टं ॥
ब्रह्माण्डादिकटाहान्तं जगत्स्थावरजंगमम्
लसंघोऽनन्तनिमेषस्पन्दयातनमिदं शिवे
तस्यामे श्रेत्र पास्पयनो ध्यायेदृमदृनिशं
ता सर्वं यास्यद्दं देवि तस्याव मे विभर्म्यहम्
तस्या नामसहस्रं तु परास्मिन्सर्ववैदिके त
स्याश्लोकेन या नित्यं तत्पंचाङ्गं स्मराम्यहम्
श्रीदेव्युवाच देवेश परमेशान कृपां बोधे
जगत्पते भवान्यावदपंचांगं यदि प्रिय
सी तव श्रीभैरव उवाच शृणु देवि रहस्यं
मे पंचांगं देव दुर्लभं गोपनीयं सदा देवि र
क्षणीयं स्वगुह्यवत् भवान्याः पटलं दिव्यम्
जापपद्धतिमीश्वरि कवचं मन्त्रगर्भं च मन्त्रना

मत्रहस्यकम् मूलमंत्रैकसर्वस्वस्तोत्रग
ह्यंमहेश्वरि एतत्स्तोत्रंगमाविलंभवान्याः
स्वरहस्यके नत्यादौपत्लेवस्पेमाताम्नार
मंत्रंपरं मूलमंत्रस्ययेत्रस्पलयोगस्यनिर्षि
शिवे मंत्रोद्धारंमहादेविशृणुतत्रेशगोपि
ते येनश्रवणमात्रेणसाधकःसिद्धिमाप्नु
वेत् अथमंत्रोद्धारः तारंलक्ष्मीइहमायां
चवतेतेमोमायामालोत्तुबंभवानि म
धेक्वैंस्याद्वंनीरमंतेमंत्रोद्धारःश्रीभ
वान्याःसमस्त इत्युद्धारप्रकाशः ॐश्रींश्री
ॐॐह्रींश्रींश्रींभवानिहूंफट्स्वाहा इतिमू
लमंत्रः नास्यविघ्नोनवादोषोनविपर्ययः।
नोभयं सिद्धसाध्यारिदोषोवानत्रस्मरण

भा.भ.
प
३

सच साक्षात्सिद्धिप्रदोमंत्रोदेविपंचदशा
क्षरः त्रिवर्गफलदोलोकेसाधकाभीष्टदा
यकः पुरश्चर्याविधानज्ञसाधकेनसुसि
द्धये वर्णलक्षंजपेन्मंत्रीनयार्थेवा महेश्व
रि एकलक्षावधिंवापिनातोन्यूनंवरेक्षि
वे जीवहीनोयथादेवीसर्वकर्मसुनक्षमः
पुरश्चरणहीनोहिनमंत्रःफलदायकः ज
पाद्दशांशतोहोमस्तद्दशांशेनतर्पणं मा
र्जनंतद्दशांशेनतद्दशांशेनभोजनं वरे
श्मशानेरण्येवाशून्यागारेचवनस्थले अथ
वातेच्छमध्याह्नेपुरश्चर्यांचरेत्सुधीः मंत्रस्या
स्यमहादेविऋषिःप्रोक्तःसदाशिवः छंदो
नुष्टुप्देवताचभवानीशिवसुंदरी माया

वीजंचवीजंस्याद्मायाशक्तिसमीरिता क्ष
चवीजंकीलकंस्याद्ह्रंदिग्वंधनेशिवे ध
र्मार्थकाममोक्षार्थेविनियोगःप्रकीर्तितः
ध्यानमस्यप्रवक्ष्यामिभवान्यामंत्रगोचरम्
सर्वतंत्रैकसर्वस्वंसाधकानांशुभावहं उ
द्यदिंदुवदनांचतुर्भुजांरक्तनेत्रकमलांशु
चिस्मितां खड्गशक्तिवरदाभयांकितांशै
नगात्मजांहृदिभजामिभवानीं इतिध्यानम्
मंत्रराजस्यदेवेशिवक्ष्याम्युत्कीलनंपरं ये
विघ्नायकलैःपीड्यमंत्रसिद्धिप्रपश्यति श्री
दिबीजद्वयंदद्यादंतेपार्वतिसाधकः सर्व
मादौपठेन्मंत्रीत्रिवारंसाधकोत्तमः उत्की
लनमस्यमंत्रस्यसर्वसिद्धिप्रदायकः प्रका॰

श्या.भ.
प
य

शाः ह्रूं ह्रूं ह्रूं श्रीं ॐ ॐ ह्रीं श्रीं श्रीं भवानि फट्
स्वाहा श्रीं उत्कीलन मंत्रः मंत्रस्यास्य
वीर्यास्य संजीवन मंत्रे शिवे यं विधाय मा
हा मंत्री स्तंतं संजीवयिष्यति बीजद्वयं तदा
दौ तदस्यात्मापकसम्मः मंत्रः संजीवना
नाम सूक्तं संजीवनः सूक्तः श्रीं ह्रूं ॐ श्रीं श्रीं
भवानि फट् स्वाहा प्रकाशो इति संजीव
न मंत्रः सिद्ध मंत्रं जपित्वा शुद्ध्या मंत्रं उत्तमा
द्यात् मंत्रस्य मंत्रे देवि क्षत्वा ग्रहात मंत्र
क ग्रयो बीजं च मंत्रादौ नाम बीजं तथैव ले
द्वा मंत्रं पठेन्मंत्रः स्यात् यं सिद्धाभिदः यं प
ठित्वा मंत्राण्यव कीलितो मंत्रको भवेत् य
थ्या सिद्धिः हानिः स्याज्जपस्य सर्वदिने श्री

काश्यं स्वाहा ॐ श्रीं श्रीं श्रीं ॐ ॐ ह्रीं श्रीं श्रीं ह्रूं फट्

भवानि इति संपुटमंत्रः एवं मंत्रं जपेद्देवि

सर्वकामार्थसिद्धये मंत्रयंत्रं च मालां च गो

पयेत्साधकोत्तमः यंत्रोद्धारं प्रवक्ष्यामि सर्व

तंत्रेषु गोपितं सर्वस्वं मोहनं यंत्रं सर्वागम

परिष्कृतं बिंदुत्रिकोणं वसुकोणं षट्को

णं तथा एवं देवि लसत्कराले वृत्तत्रयं कथ

यामि भूगृहाख्यं विराजते यंत्रमिदं भवान्याः

इति यंत्रोद्धारः लयांगं च मदेवेशि रहस्यं

सर्वकामदं येन श्रवणमात्रेण कोटि

यज्ञफलं लभेत् गणेशो बटुकश्चैव धर्म

राजः क्षेत्रपालकः एते द्वारस्थाः सदा सर्व्वाः पू

जयेत्सिद्धिमिच्छयाः कामान् इति द्वारपूजा काली

काकालरात्रिश्च भद्रकाली च कुब्जिका ज्वा
लामुखी च सुमुखी भेरुण्डा च भगमालिनी ।
शारिका शारदा चैव तारा त्रिपुरभैरवी वा
राही छिन्नशीर्षा च बाला च भुवनेश्वरी प
ना सदार्चनीयास्तु षोडशा रेणु साधकैः वा
मावर्त्तक्रमेणैव गन्धपुष्पाक्षतादिभिः ब्रा
ह्मी च वैष्णवी चैव शांभवी चापराजिता कौ
मारी च तथैन्द्राणी भैरवी नारसिंहिका प
नाः संपूज्या यो देवि मंत्रिणा ष्टदलेषु च वा
मावर्त्तक्रमेणैव धूपदीपप्रसूनकैः दुर्गा
गौरी महालक्ष्मी चण्डिका वज्रयोगिनी स
रस्वती च मातङ्गी कुलवागीश्वरी तथा प
नाः संपूजनीयाश्च सान्निध्ये वं सह कोणगाः

वामावर्त्तेन देवेशि सिंदूरकुंकुमादिभिः
गंगा च यमुना चैव तथा देवी सरस्वती ई
शानाग्नेयमरुतः पूजनीया त्रिकोणके
बिंदौ संपूजयेद्देवि श्रीभवानीं परेश्वरि पं
चदशान्तरे देवि शिवा वा पद्मावती तथा का
त्यायिनीमेकजटां नवदूर्वाक्षतादिभिः उ
पर्युपरि संपूज्य भैरवं पूजयेत्ततः महाका
लं च कालाग्निं करालं विकरालकं उन्मत्तं
कालरुद्रं च संहारं रुरुभैरवं सदाशिवं
महेशानं बिंदौ संपूजयेत्सदा गंधाक्षता
दिभिर्धूपदीपादितर्पणैः पतद्ग्रहयो
र्गमीशानि बिंदौ संपूजयेत्सदा पतत्पट
लमीशानि सर्वदेवरहस्यकं गोपनीयं

श्रीःभ
प
५

6

प्रयत्नेनसर्वस्वंसमवाप्नोति प्रयोगान्सं
वक्ष्यामिसाधकानांहितायच यान्विधाय
कलौमंत्रीसर्वदासिद्धिभाग्भवेत् स्तंभनंमो
हनंचैवमारणाकर्षणेतथा वशीकारंतो
येच्चाटंशांतिकंपौष्टिकंतथा प्रयोगानह
वक्ष्यामिसर्वतंत्रेषुविश्रुतान् एतेषांसाध
नेवक्ष्येगोपनीयंप्रयत्नतः रवौप्रातःसमु
त्थायगत्वावटतरोरधः जपेन्मूलाष्टुतंदे
वियथाशक्त्याविशेषतः दशांशासंख्यया
कार्योहोमःसर्पिर्यवांबुजैः रक्तस्वलांबरैर
मैःसितावर्त्तूरमालकैः कर्मणामनसा
वाचास्तंभनंजायतेध्रुवं सिद्धासैन्यादिदस्त
नंगतेवांनार्कपाद्यसां स्तंभनं गुरौमध्या

ह्नवेलायां श्मशाने वा चतुष्पथे प्रभूते च
जपेन्मूलं होमं कुर्याद्दशांशतः मृद्वीका
क्षीरसिंदूरटंकणसर्पिर्भिर्होमयेः तर्पयि
त्वा दशांशेन मोहने जायते ध्रुवं मोहने
कृते सूर्यादिने देवि गत्वा प्रेतस्थलीं शिवे
वितानं गात्रवसने देवि सुरक्तके शादिगोवः प्र
थमे जपेन्मूलं साधको घृतसंख्यया वि
नाशैश्छन्न खंडादिस्रक्कास्थिवल्कनाभका
न् जुहुयाद्दशांशेन पात्रमर्दस्य खंडके
न मारणम् २ सूर्यदिने शुभनक्षत्रे गत्वा कू
पस्थलां गतिं एकांते भजपेन्मंत्रं साधको
मंत्रसाधकः होमं सर्पिर्हरिद्रादिपीतव
स्यातिवीजकैः मीनकानाकवासापिप्प

ग्रा॰भ॰
पं॰
७

तः प्रादुर्भविष्यति आकर्षणं च संक्रान्ताः
वचनेनापि त्वा गत्वा वनान्तरे पञ्चाशीः
ति जपेन्मूलमन्त्रं तं साधको नमः क्रयोद्धे
मं दशांशेन हुतपायसकेसरैः रक्तपुष्पै
रक्तवस्त्रैर्गन्धपुष्पैः समन्वितैः देवतावशा
मायान्ति किं पुनः क्षुद्रमानुषाः वशीकर
णम् ५ उद्धृतो भूमिकम्पे वानयोल्कापा
तने पि वा प्रयोगारम्भतां कुर्यादि उच्चाटन
हेतवे प्रवृत्ते मन्त्रं जपेन्मूलं होमः सर्पिरटाव
कैः पक्षमेधैः कपोतानां प्राणेभिर्नीलवस्त्र
कैः कर्मणामनसा वाचा रिपुमुच्चाटयेद्ध्रुवं
उच्चाटनं ६ शुभे स्थिरे साधको देवि गत्वा देवा
लयं क्वचित् नत्वा स्वं देवमभ्यर्च्य पूजयित्वा

7

महेश्वरी जपेन्मंत्राश्रुतं देवि साध्यं साधक
वेदितो जप्यांते होमं दशांशेन केशोमीसैल
ध्यांत्रकैः वायसानां कपोतानां उकहूटानां
महेश्वरि यद्दाराणामतिक्ष्णीनां वह्निकोपः
सपावेति त्रिवर्गस्य तुष्टस्य सपयः शांति
र्भविष्यति शांतिके १ शुभवारे स्वच्छसूत्रेण
त्वानयामलं शांतिके त्रिशूलस्य भोगे देऊ
यांक्षीत्र महेश्वरि तत्रैव स्वर्पकासीनो जपे
न्मलाश्रुतं शिवे साधको जपसंख्याय दशां
शंहोममारभेत् हुतेन माससहितैः स्वरै
वीयससंभवैः देवानां च ऋषीणां च मन्त्र
ष्याणां महेश्वरि पितृणां साधके शानिमा
हापापैः प्रजायते पौष्टिकं २ इत्येवं साधक :

श्रा॰भ
पं
८

ऊर्ध्वाम्नायोगानां च साधनम् येन काली
पदं यान्ति साधकोत्तमैश्च साधकः इतीदं पट
लं गुह्यं त्रिषु लोकेषु दुर्लभं न वक्तव्यम
याख्याते गोपनीयं स्वयोनिवत् ॥ इति
श्रीरुद्रयामले तंत्रे भवानीपटलः समा
प्तम् ॥ ॥ ॐ श्रीगणेशाय नमः भैर
व उवाच ॐ शृणु देवि प्रवक्ष्यामि पद्धतिंग
द्यपिणीं भवान्याः स्नानस्यादौ स्नानसं
ध्यासमन्वितो ब्राह्मे मुहूर्ते उत्थाय बद्धपद्मा
सनः शिरःस्थसहस्रारपोत्रुवेष्ठेनकम
लकर्णिकांतर्गते श्वेतश्वेतनालेकारभूषि
तयाभूषिते दिव्यमालालंकृते ध्यात्वा सा
ष्टांगं प्रणिपत्याज्ञपाजपेजयेत् तत्कृत्वा

गुरवे समर्प्य स्वहृदि देवीं सशिवां ध्या
त्वा मनसा बाह्य यथाशक्त्या मूलं जप्त्वा दे
व्यै समर्प्य स्वहृदि विसृज्य बहिरागच्छेत्
बहिर्गत्वा मौनीभूय मलमूत्रादीन्संत्यज्य
नदीतीरमागत्य यथावर्णाश्रमोचितम्
शौचमादाय हूं फट् इति दन्तकाष्ठं गृही
त्वा मायाबीजेन दन्तान्विशोध्य रमाबी
जेन गंडूषत्रयं विधाय नारंदेहेन वासां
सि विहाय मूलेन मन्त्रत्रयं संशोध्य पुनर्मू
लेनावगाह्य ॐ गंगे च यमुने चैव गोदा
वरि सरस्वति नर्मदे सिंधु कावेरि जलेऽस्मि
न्सन्निधिं कुरु इति मन्त्राग्रके जलेनिवि
प मूलमुच्चार्य उद्यत्सूर्येन्दीमां सवर्णा

३ ग्रा.भ. पं ५ 9

भयकरे शिवे शावासनेच सशिवे नलो-
स्मिन्हृत्सरोवरे इति मद्भागं जलेनिलिख्य
ततस्त्रिकोणं विभाव्य तत्र तीर्थान्यावाह्य
अंकुशमुद्रया देवीं सशिवां सात्म्य मूलमु-
च्चार्य मद्भागमेकं स्वदेहे विलिख्य मूलेन +
मु दिकयाञ्जलमासाद्य त्रिर्द्विवं प्रताल्य मू-
लमुच्चरञ्जलेन स्वात्मानमवतार्य सम्मया
मूलमुच्चार्य त्रिः पदादि शिरः पर्यंतमुन्मृ-
ज्येत् ततो ह्रीं बीजेनाचमेत् ह्रीं शिवतत्वं
शोधयामि स्वाहा ह्रीं शक्तितत्वं शोधया-
मि स्वाहा + इत्याचम्य मूलेन प्राणायामं वि-
धाय ह्रीं हंसः सूर्याय एष तेऽर्घो नमः इति
सूर्यायार्घत्रयं दत्वा ॐ ह्रीं श्रीं भवान्यै वि

ॐ ह्रीं शिवप्र क्ति तत्वं शोधयामि स्वाहा

महे ॐ ॐ ह्रीं भगमालिन्यै धीमहि श्रीं श्रीं।
ह्रीं तन्नो दुर्गा प्रचोदयात् १ इति गायत्री
यथाशक्त्या जप्त्वा सशिवायै शिवायै श्रा
र्घ्यं च यं दत्त्वा पूर्ववत् त्रिराचम्य जलादाहत्य
शिरसि परिधाप्य संध्यां कुर्यात् तत्र मूले
न प्राणायामं विधाय ॐ ११ हूं ३२ रं ६४
त्रिराचम्य वामकरे तज्जलमादाय हं वं यं ल
रं षां षं सं तं हंसः इति मन्त्रयाभिमन्त्र्य ॐ
श्रीं श्रीं ॐ ॐ ह्रीं श्रीं श्रीं इति हस्तेनाच्छाद्य यं यं
रं लं वं इति गलितोदकबिन्दुभिः शिरः प्रोक्ष्य
हूं फडिति मन्त्रेण वज्रशिलायामास्फोटये
दिति अघमर्षणं विधाय पूर्ववन्मूलसूर्या
र्घ्यं गायत्रीं जप्त्वा मनसा सशिवां शिवामा

श्या.भ.
प
१

सत्व मनसा ध्यात्वा मानसोपचारैः संपूज्य
मूलमंत्रेण यथाशक्त्या जप्त्वा ततः सूर्याया
र्घ्यत्रयं दत्वा देवीं तर्पयेत् मूलेन जलेन
त्रिकोणं विभाव्य सहस्रदया जलमालोड्य
जले मूलेन शिवां सषावां शिवामावाह्य।
ॐ श्रीं ह्रीं गणेशास्तर्पयामि २ ॐ ह्रीं श्रीं वटु
कस्तर्प० २ धर्मराजस्तर्प० २ कुबेरस्तर्प० २
मूलं सशिवाशिवास्तर्प्यताम् ॐ ह्रीं श्रीं का
लिकास्तर्पयामि २ कालरात्रिस्त० २ भद्रका
लीस्तर्प० २ कुब्जिकास्तर्प० २ ज्वालामुखी
स्तर्प० २ सुमुखीस्त० २ भेरुण्डास्त० बगलामु
खीस्तर्प० २ धारिकास्त० २ शारदास्त० २
नारास्त० २ त्रिपुरसुंदरीस्त० २ वाराहीस्त० २

छिन्नशीर्षान्त॰ २ बालान्त्यम्॰ २ भुवनी
श्वरीन्त॰ २ मूले सषिवाषिवान्त्यम्॰ २
ॐ ऐं ह्रीं श्रीं ब्राह्मीन्त॰ २ वैस्नवीन्त॰ २ शांभ
वीन्त॰ २ अपराजितान्त॰ २ कौमारीन्त॰ २
इन्द्राणीन्त॰ २ भैरवीन्त॰ २ नारसिंहिका
न्त॰ २ मूले सषिवाषिवान्त॰ २ ॐ ऐं ह्रीं
श्रीं दुर्गान्त॰ २ गौरीन्त॰ २ महालक्ष्मीन्त॰ २
चंडिकान्त॰ २ वज्रयोगिनीन्त॰ २ सरस्व
तीन्त॰ २ मातंगीन्त॰ २ ज्वलवागीश्वरी
न्त॰ २ मूले सषिवाषिवान्त॰ २ ॐ ऐं ह्रीं श्रीं
गंगान्त २ यमुनान्त॰ २ सरस्वतीन्त्यम्॰ २
मूले सषिवाषिवान्त॰ मूले श्रीउग्रन
मतेष्टदायज्वलकौलिकाचारप्रकटन

श्रीभ॰
पं
११

रस्यभावमयीश्रीपंचदशाक्षरीभवानी
त्व॰ ३ मूले शिवाल्यान्तो मूले १ का॰
त्यायनीत्व॰ मूले १ एकजटात्व॰ मूले १
श्रीमत्क्रमनराविंस्यभावमयीश्रीभवा
नीसशिवाशिवाभगवतीत्यानामिति
ति॰ संतर्प्य मूले १ महाकालस्त्व॰ १ मू
ले १ कालाग्निस्त्व॰ मूले करालस्त्व॰ १ वि
करालस्त्व॰ १ मूले श्रीसदाशिवस्त्व॰
श्वनः मूले १ उन्मत्तस्त्व॰ १ कालरुद्रस्त्व॰ १
श्रीभगवतीभवानीसशिवाशिवात्या
नो इतिसमथासंतर्प्य ॐ ह्रीं श्रीं हूं गुरुसंत
र्पयामिनमः ३ पंचपरमगुरुसंतर्पया
मिनमः ३ सशिवाशिवात्मनो ॐ॰

श्रीं ह्रीं श्रीं पितृगणाय नमः· योगिनीगणाय नमः·
२ भूतगणाय नमः· मूले १ श्रीभवानीयाग्या
भवानी भगवती सशिवा शिवा नमः· ३
त्रिदेवीं संतर्प्य पूर्ववत्स्रग्ध्यायाच्चमयेदा
त्वा सशिवाशिवां हृदि विसृज्य यागगे
हमागच्छेदिति संध्याविधिः ततो याग
गेहे मेरुपादौपत्ताल्ययागस्थानमंडपंप्र
विश्य द्वारपूजां कुर्यात् गांगीं गूं गणपा
तये नमः पूर्वे गांगूं येरंलेवेंशांषेंह्लेंलेत्तः
इति मंत्रेण सम्यग्देहलीं जलेनाभ्युक्ष
गंगां गूं गंगायै नमः दक्षिणे यंयांयूं य
मुनायै नमः उत्तरे संसांसूं सरस्वत्यै नमः
मध्ये वंवांवूं वास्तुकायै नमः ऊर्ध्वे दंदांदूं

प्राभ
पं
१२

देहल्यैनमः धंधर्मायनमः ज्ञानाय
नमः वैराग्यायनमः ऐश्वर्यायनमः इत्य
थैं नंनृसिंहायनमः अथः अंअं
अलिंदायनमः अंअधर्मायनमः अंअज्ञा
नायनमः अंअवैराग्यायनमः अंअनैश्वा
र्यायनमः इतिद्वारपूजांविधि मूलं १ स
शिवायैशिवायनमोनमः ततःउपवि
श्यपूजाकर्मारभेत् ॐ अस्यआसनशुद्धिमं
त्रस्य मेरुपृष्ठऋषिः सुतलंछन्दः कूर्मो
देवता आसनशोधनेविनियोगः पृथ्वी
त्वयाधृतालोकादेवित्वंविष्णुनाधृता
त्वंचधारयमांदेविपवित्रंकुरुचासनम्
पृथिव्यैनमः ॐ आधारशक्तयेनमः

ओंह्रीं कूर्माय नमः ओं अनन्ताय नमः श्री
नालाभाय नमः सः सहस्रदलकमला
सनाय नमः ओं अपसर्पन्तु ते भूता ये भू
ता भुवि संस्थिताः ते भूता विघ्नकर्तार
स्ते नश्यन्तु शिवाज्ञया इति तालत्रयं दा
त्वा वामपार्ष्णिघातान् त्रयेण विघ्नानुत्सा
या र्य नाराचमुद्रां प्रदर्शयेत् ततो ध्याये
त् अखंडमंडलाकारं व्याप्तं येन चराचरं
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः १
इति नत्वा ओं गुरुभ्यो नमः २ परमगुरु
भ्यो नमः २ परापरगुरुभ्यो नमः २ परा
मेष्ठिगुरुभ्यो नमः २ इति संपूज्य पूजा
मेकल्पं कुर्यात् ओं अस्य श्रीभवानीपूजा

भ्रा.भ.
प.
१३

मंत्रस्य श्रीसदाशिवऋषिः अनुष्टुप्छं-
दः श्रीभवानीदेवता ह्रींबीजं श्रींशक्तिः
ह्रूंकीलकं फट्दिग्बंधः धर्मार्थका-
ममोक्षार्थे यंत्रपूजायांविनियोगः अथ
न्यासः ॐसदाशिवऋषयेनमःशिरसि
अनुष्टुप्छंदसेनमोमुखे भवानीदेवता-
येनमोहृदये ह्रींबीजायनमोनाभौ श्रीं
शक्तयेनमोगुह्ये ह्रूंकीलकायनमः जं-
घयोः फट्दिग्बंधनायनमःपादयोः धर्मा-
र्थकाममोक्षार्थेपाठेविनियोगायनमः
सर्वांगेषु अथमूलन्यासः ॐनमःशिर-
सि श्रींनमोनेत्रयोः श्रींनमःकर्णयोः ॐ
नमोमुखे ॐनमःकंठे ह्रींनमःपाण्योः

श्रीं नमः पार्श्वयोः श्रीं नमः हृदये श्रैं नमो
नाभौ वों नमो गुह्ये लिं नमः जान्वोः ह्रूं नम
गुल्फयोः फट्‌नमः पादयोः स्वां नमः पा
दादि शिरः पर्यंतमिति विधाव्यापयेत्‌ इ
ति मूलमंत्रन्यासः ॐ श्रीं ह्रां अंगुष्ठाभ्यां न
मः ॐ श्रीं ह्रीं तर्जनीभ्यां नमः ॐ श्रूं ह्रूं मध्य
माभ्यां नमः ॐ श्रैं ह्रैं अनामिकाभ्यां नमः
ॐ श्रौं ह्रौं कनिष्ठिकाभ्यां नमः ॐ श्रः ह्रः क
रतलकरपृष्ठाभ्यां नमः इति करन्यासः
श्रां ह्रां हृदयाय नमः श्रीं ह्रीं शिरसे स्वा
हा श्रूं ह्रूं शिखायै वौषट्‌ श्रैं ह्रैं कवचाय
हुं श्रौं ह्रौं नेत्रेभ्यो वौषट्‌ श्रः ह्रः अस्त्राय फ
ट्‌ इति हृदयन्यासः इति षडंगन्यासं वि

प्रा.भ.
पं
१४

धाय ह्रीं शिवनन्तेषोपयामि नमः ह्रीं शा
क्तिनन्तेषोपयामि स्वाहा ह्रीं शिवशाक्तिन
न्तेषोपयामि स्वाहा इत्याचम्य ह्रीं श्रीं इत्या
दिनाप्राणायामंत्रियाविधाय ह्र ११ क्रों र ९
रे ६५ इतिप्राणायामंत्रिर्विधाय हवींक्षं
षडंगंविधाय प्राणायामयोगेनषडंगंहृ
दैंभूतशुद्धिंकुर्यात् एवंवत्षडंगंविधाय
ऐंहूंइत्यंक्रोंनसङ्गमार्गवर्त्मना प्रदीपक
लिकाकारंजीवंब्रह्मपथेननीत्वापरम
शिवैवैश्वर्यंरूपेपरमशिवेसंयोजनीयः
तत्रयंवायुवीजेनषोडशवारजप्तेनधूम्र
वर्णेनचतुष्कोणेनशोषितमांसमज्जा
दिभिर्वोमशुद्धिगतनंवंपुरुषमात्राकारं

कृष्णवर्णं रक्तनेत्रं शोषयेत् रं इति वह्नि
बीजं दशधा जपन् रक्तवर्णेन त्रिकोण
न दाहयेत् वमित्यमृतबीजेन द्वादशवारं त
जपेत पीतवर्णेन षट्कोणेन गलदमृ
तवृष्ट्या प्लावयेत् यमित्यमृतबीजेना
त्रिवारं जपेन निजशरीरं तन्नीत्वा शुद्ध
स्वात्मानं दिव्यदेहं विभाव्य प्राणप्रतिष्ठा
स्थापयेदिति भूतशुद्धिः ॐ सोंहंहंसः म
म प्राणा इह प्राणा मम जीव इह स्थितः
मम सर्वेन्द्रियाणि मम वाङ्मनश्चक्षुःश्रो
त्रजिह्वाघ्राणप्राणा इहागत्य सुखं चिरं
तिष्ठन्तु स्वाहा इति प्राणान् संस्थाप्य तत
स्वहृदि संस्पृश्य चेति प्राणप्रतिष्ठा का

श्या॰भ॰
प॰
१५
15

मः सर्वेवदावमप्युनः षडंगन्यासं विधा
य मंत्रसंकलंकुर्यात् ॐ अस्य श्रीभवा
नीमूलमंत्रस्य श्रीसदाशिवऋषिः अ
नुष्टुप्छंदः श्रीभवानीदेवता ह्रीं बीजं
श्रीं शक्तिः हूं कीलकं फडिति दिग्बंधः ।
धर्मार्थकाममोक्षार्थे विनियोगः अथ ।
ध्यानम् उद्यदिंदुवदनां चतुर्भुजां त्रि
नेत्रकमलोल्लसितां खड्गशक्तिवरा
दाभयांकितां श्वेतगां हृदि भजामि भवा
नीं इति ध्यात्वाक्षरन्यासादिन्यासं विधाय त
त्त्वन्यासं कुर्यात् ॐ ह्रीं शिवतत्त्वाय हृदं
याय नमः ॐ ह्रीं शक्तितत्त्वाय शिरसे स्वा
हा ॐ ह्रीं शिवशक्तितत्त्वाय शिखायै वौ

षट् ॐ ह्रीं विद्यातत्त्वाय कवचाय हुं ॐ ह्
ह्रीं शिवतत्त्वाय नेत्रेभ्यो वौषट् ॐ ह्रीं सर्व
तत्त्वाय अस्त्राय फट् इति षडंगः एवं कर
न्यासः अथ मंत्रमातृकावक्त्रेभ्यो नमः
ॐ अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः श्री
श्री इं चं छं जं झं ञं ईं तर्जनीभ्यां नमः ॐ उं
उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः ह्रीं श्रीं श्रीं
ऌं तं थं दं धं नं ॡं अनामिकाभ्यां नमः
भवानि एं पं फं बं भं मं ऐं कनिष्ठिकाभ्यां न
मः ह्रूं फट् स्वाहा ॐ औं यं रं लं वं शं षं सं हं
ळं क्षः अं अः करतलकरपृष्ठाभ्यां नमः इ
ति करन्यासः एवं हृदयादिन्यासः अथ
पीठन्यासः ॐ श्रीं ह्रीं अयोध्यापीठाय न

श्रा.भ.
प
१९
16

रूपाय नमः ओंॐ मथुरीपीठाय शिरसे
स्वाहा ह्रीं श्रीं वाराणसीपीठाय शिखायै
वौषट् भवानीजालंधरीपीठाय नमः क
वचाय हुं हुं फट् उड्डीयानपीठाय नमः
नेत्रेभ्यो वौषट् स्वाहा पीं कांचीपुरीपीठा
य नमः अस्त्राय फट् इति पीठन्यासः एवं
करन्यासः अथ मातृकान्यासः अं नमः
केशान्ते आं नमः मुखे इं नमः दक्षने ईं नमः त्रे
वामे उं नमः दक्षकर्णे ऊं नमः वामे ऋं न
मः दक्षनासापुटे ॠं नमः वामे लृं नमः द
क्षिगंडे ॡं नमः वामे एं नमः ऊर्ध्वोष्ठे ऐं नमः
अधरोष्ठे ओं नमः ऊर्ध्वदन्तपंक्तौ औं नमः
अधोदन्तपंक्तौ अं नमः शिरसि अः नमः मु

वे कं नमः दक्षबाहुमूले खं नमः कूर्परे
गं नमः मणिबन्धे घं नमः अङ्गुलिमूले ङं
नमः अङ्गुल्यग्रे चं नमः वामबाहुमूले छं
नमः कूर्परे जं नमः मणिबन्धे झं नमः अ-
ङ्गुल्यमूले ञं नमः अङ्गुल्यग्रे टं नमः दक्ष-
पादमूले ठं नमः जानुनि डं नमः गुल्फे ढं
नमः अङ्गुलिमूले णं नमः अङ्गुल्यग्रे तं न-
मः वामपादमूले थं नमः जानुनि दं नमः
गुल्फयोः धं नमः अङ्गुलिमूले नं नमः अ-
ङ्गुल्यग्रे पं नमः दक्षपार्श्वे फं नमः वामपा-
र्श्वे बं नमः पृष्ठे भं नमः नाभौ मं नमः जठ-
रे यं नमः हृदि रं नमः दक्षांसे लं नमः वा-
मे वं नमः ककुदि शं नमः हृदादिदक्षक

श्रा॰भ
पं
१२

17

स्ताग्रांते षंनमःहृदादिवामहस्ताग्रांते
संनमःहृदादिदक्षपादाग्रांते हंनमःहृ
दादिवामपादाग्रांते लंनमःपादादिशिरः
पर्यंते क्षंलंनमःशिरःपादपर्यंते इतिव्या
पयेत् इतिमातृकान्यासः ततःमूलषडं
गंविधाय मायाबीजेनषडंगंविधाय श्री
गुरुंमनसाध्यात्वादेवींसशिवांमनसा
ध्यात्वा श्रीचक्रंमनसाविभाव्ययत्ताल्या
वावितिलक्षंजपेत् तत्रदेवीध्यायेद्यथा
सशिवांशिववविपरीतपविष्ठांपरिहृतांडु
ग्रंथीं त्रिलोचनां वरदाभयपाशांकिचतुर्द
स्तांस्यादिश्रीचक्रगतां स्मरेभवानी इतिध्या
त्वामनसैकपचारैःसंपूज्य वहिस्सष्टीचा

कं ध्यात्वा चतुरस्रे त्रिरेखोज्वले षोडशी
लेस्वष्टनवयंच स्वदले ष्टलाकारे वसुको
णे विद्रविराजमाने विभाव्य श्रीचक्रे यो
गपीठपूजामारभेत् ॐ ह्रीं श्रीं मंडुकाय
नमः २ कालाग्निरुद्राय नमः २ मूलप्र
कृत्यै नमः २ आधारशक्त्यै नमः २ कू
र्माय नमः २ अनंताय नमः २ वराहा
य नमः २ सत्यरूपाय नमः २ समुद्राय
नमः २ पृथिव्यै नमः २ स्वर्णपर्वतपरिसे
वृत्य २ सुधार्णवाय नमः २ मध्ये नवा
रत्नविराजितनवरत्नखंडमयद्वीपाय
नमः २ पद्मरागखंडाय नमः २ स्वर्णगि
रये नमः २ नंदनोद्यानाय नमः २ क

श्रीभ.
पं.
२८

18

त्ववनायनमः २ पद्मवनायनमः २ वि
चित्ररत्नखचितरत्नवेदिकायैनमः २ र
त्नसिंहासनायनमः २ तन्मध्येसहस्रा
रपद्मायनमः २ प्रकृतिमयकेसरेभ्यो
नमः २ विकृतिमयैपत्रेभ्योनमः २ तन्म
ध्येपंचदशाक्षरीबीजभूषितकर्णिका
यैनमः २ तत्रापि २ धर्मायनमः २ ज्ञाना
यनमः २ वैराग्यायनमः २ ऐश्वर्यायनमः २
वामतः २ अधर्मायनमः २ अज्ञानायन
मः २ अवैराग्यायनमः २ अनैश्वर्यायन
मः २ मध्ये २ सं सत्वायनमः २ रं रजसेन
मः २ तं तमसेनमः २ ओंह्रींश्रींमूलश्री
चार्यं श्रीपंचदशाक्षरीबीजाढ्यश्रीयोग

पीठेश्वरायनमः इतियोगपीठपूजांविधा
यतत्रश्रीचक्रेमूलमन्त्रार्ये श्रीभवानीसा
मान्यार्घ्यमंडलायनमः ॐनमःदक्षे ह्रीं
नमःवामे श्रींनमःअग्रे इतित्रिकोणमभ्य
भ्यर्च्य तत्रचतुरस्रे ॐनमःईशाने ह्रींआ
ग्नेय्यै श्रींनमःनैरृते ॐनमःवायव्यै ह्रींन
मःमध्ये श्रींनमःसर्वदिक्षु इतिषडङ्गान्तै
रभ्यर्च्य तत्रमंडलेनमोस्त्रायफट् इतित्रि
पादिकांपरिपात्रंसंस्थाप्य रंवह्निमंडला
यदशकलात्मनेनमः इतितत्रामृताभि
नेपात्रंसंस्थाप्य पात्रे २ अंअर्कमंडला
यद्वादशकलात्मनेनमः इत्यभ्यर्च्य मूल
मन्त्रार्येविलोचनमातृकयासंपूर्य सौः

याम॰
पं
१९

19

सोममंडलाय षोडशकलात्मने नमः इति
संपूज्य मूलाभ्याभिमंत्रितं कृत्वा गं गीं गृ
गः गंगे च यमुने चैव गोदावरि सरस्वति
नर्मदे सिंधु कावेरि जलेऽस्मिन्सन्निधिं कुरु
इति तीर्थमावाह्य षडंगं भावयेत् दर्शनेना
पि पापस्य किं पुनः स्पर्शनेन च विलयं या
यांति पापानि हिमवद्भास्करोदये इति संपू
ज्य स्वात्मकलशं पूजयेदिति सामान्या
र्घ्यविधिः वामे त्रिकोणषट्कोणवृत्तचतु
रस्रमंडले कृत्वा तन्मंडलेनाभ्यर्च्य तत्रा
स्त्रतालितां त्रिपादिकां संस्थाप्य रं वह्निमं
डलाय दशकलात्मने नमः इत्यभ्यर्च्य तत्रा
स्त्रतालितं कलशं संस्थाप्य अं अर्कमंड

लायद्वादशकलात्मनेनमइत्यगंधस्ना
नपुष्पैरभ्यर्च्य तत्रनासिकाग्रंसकरा
स्तनयावपातेनकलशमासृद्यसौः सो
ममंडलायषोडशकलात्मनेनमइत्यभ्य
र्च्य श्रांह्रांह्रूंफट्इतिदिशोबध्वा श्रांश्रींश्रूं
श्रैंश्रौंश्रंश्रः अस्त्रेणअस्त्रेणोद्भवेअस्त्रेणव
र्तिनिअस्त्रेणस्रावयस्रावयशुक्रशापंमो
चयमोचय ॐह्रींश्रींसुरादेव्यैवौषट् इ
तिसमयाभिमंत्र्य ॐह्रींश्रींसुरादेव्यैवौ
षट् इतिसमाभिमंत्र्य ॐह्रींश्रींहसक्षमल
वरयूंआनंदभैरवायवौषट् ॐह्रींश्रीं
आनंदभैरवायसुरादेवीपादुकाभ्यो
नमः इत्यभ्यर्च्य पंचयोनिमुद्रांप्रदर्श्य

ग्रा॰भ॰ प॰ २॰ त्पत्रद्वयाच्छादयेत् इत्युक्त्वायवेदानोथा
त्मवैवीजंब्रह्मानंदमयोयदितेनसत्येना
मेदेविब्रह्महत्याविद्रवत एकमेवपरो +पो
४०
वीजंब्रह्मानंदमयंयदि सत्येनत्वंपरो
क्षांतेतेनत्वांपावयाम्यहं पावमानःपरा
नंदःपावमानःपरोरसः पावमानेपंरत्ना
नंतेतेनत्वांपावयाम्यहं अनेनमेव्रतानेना
शुक्रशापाद्विमुच्यतो शुक्रशापविनिर्मु
क्तात्वंशुक्राब्रह्मशापतः कचोस्यब्रह्मदा
स्यायाःपविन्नाभवसांप्रतम् इतिसंमंत्र्या
सामान्यार्घ्यस्यदत्तेकलशावनमंडलेका
लशावनाग्रंकलशावनमंडलवनतद्वयंवि
धायपांत्ववस्त्रंजयेत् ततश्रीखलीपात्र

मथः पंक्तानंतर पात्राचमनीयपात्राणि संस्थाप्य संपूजयेत् तत्रचवडुकपात्रं शो खवडुकं तरे संस्थाप्य मूलेन पूजयेदिति पा त्रस्थापनविधिः तत्र मूलेनानंदभैरवं को पविष्टां देवीं ध्यात्वा पाद्यार्घ्याचमनीया दि परिकल्पयेत् मूलं सशिवायै भवान्यै मधुपर्काचमनीयादि परिकल्पयेत् त त्र मूलेन तैलाभ्यंगनीयं स्नानादि विधाय पुनरलंकरणैरलंकृत्य श्रीचक्रे मनसा ध्यात्वोपविष्टां संपूजयेत् तत्र इष्टेन गंधाक्ष तपुष्पधूपदीपादीनभिमंत्र्य मूलेन धूप दीपादि निवेदयेत् २ मूलं नैवेद्यं निवेद्य मूलं गंडूषचषके निवेद्यतांबूलादि समर्प्य

येत् ततो मूलन्यासं विधाय सर्ववज्ञात्वा
श्रीचक्रे चक्रराजे पूजयेत् ॐ ह्रीं श्रीं सर्वसंमो
हनाय चक्राय नमः इति पुष्पांजलिं दत्वा ।
ॐ ह्रीं श्रीं ग्लौं गं गणपतये नमः ॐ ह्रीं श्रीं सुं कुं
वकणराजाय नमः ॐ ह्रीं श्रीं ल्लां कुं कुबेरा
य नमः ॐ ह्रीं श्रीं इति दिशो वस्त्रगंधाक्षतैः
पुष्पादिभिरभ्यर्च्य पूर्वपश्चिमदक्षिणोत्तर
क्रमेण प्रथमावरणे २ ॐ ह्रीं श्रीं क्रीं कालि
कायै नमः २ ह्रूं कालरात्र्यै नमः २ भैं भद्र
काल्यै नमः २ क्लौं कालिकायै नमः २ द्रीं ज्वा
लामुख्यै नमः २ ऐं स्वसुख्यै नमः २ ह्लौं भीडा
यै नमः २ ह्लीं भगलामुख्यै नमः २ पों श्मशानि
कायै नमः २ घाररदायै नमः २ ॐ नारायै नमः

श्रींत्रिपुरसुंदर्यैनमः २ सौंवाराह्यैनमः २
छैंछिन्नशीर्षायनमः २ पैंबालायैनमः २
ह्रींभुवनेश्वर्यैनमः २ इतिगंधाक्षतपुष्पै
र्वामावर्तेनसंपूज्य इतिद्वितीयावरणम्
ॐह्रींश्रींब्रांब्राह्म्यैनमः २ वैंवैष्णव्यैनमः २
मैंह्रींमांमहेश्व्यैनमः २ ॐअपराजितायैन
मः २ क्रौंकौमार्यैनमः २ ऐंइंद्राण्यैनमः
भैंभैरव्यैनमः २ ॐक्षौःनारसिंह्यैनमः २
इतिवामावर्तेनधूपदीपनैवेद्यैरभ्यर्च्यतृ
तीयावरणम् २ ॐह्रींश्रींसर्वेषामाहूरक
चक्रायनमः इतित्रयांजलित्रयंदत्त्वाऽष्ट
कोणेषुपूजयेत् ॐह्रींश्रींदुंदुर्गायैनमः २
गंगंगायैनमः २ श्रींमहालक्ष्म्यैनमः २ ह्रीं

श्रा.भ.
प
२२

चंडिकायैनमः २ ह्रूंवज्रयोगिन्यैनमः २
ऐंसरस्वत्यैनमः २ क्लींमातंग्यैनमः २ ह्रीं
कुलवागीश्वर्यैनमः २ इतिसिंहासनत्रये
वामावर्तेनाभ्यर्च्यचतुर्थावरणं ४ ओंह्रीं
श्रींगांगंगायैनमः दक्षे २ यंयमुनायैनमः २
वामे सौः सरस्वत्यैनमः अग्रे इत्यक्षतगंधा
दिभिः संपूज्य पंचमावरणम् ५ ओंमूलस्व
त्वायं श्रीभवानीसदाशिवपादुकाभ्यो नमः
इतिबिंदौ मूले शिवायनमः मूले पद्माव
त्यैनमः मूले कात्यायन्यैनमः मूले एकज
टायैनमः इतिगंधाक्षतधूपदीपधूपादि
भिरभ्यर्च्यषष्ठावरणम् ६ ओंह्रींश्रींह्रांमा
हाकालायनमः २ ह्रौंकालाग्न्यैनमः २ ह्रूं

करालाय नमः २ क्रों विकरालाय नमः २
उन्मत्ताय नमः २ कालरुद्राय नमः २ सौः सं
हाराय नमः २ रां रक्तभैरवाय नमः मूलं
सदाशिवाय नमः इति विंदो उपर्युपरि सं
पूज्य मूलं गंधाक्षतपुष्पधूपदीपनैवेद्यतां
बूलादीन्समर्प्य सप्तमावरणं ७ ततः स्ववा
मे चक्रेश्वरीभैरवान्त्रयेण गुं गुरुभ्यो नमः २ श्री
परमगुरुभ्यो नमः २ श्रीं परमेष्ठिगुरुभ्यो न
मः २ श्रीं परापरगुरुभ्यो नमः इति गंधाक्ष
तैरभ्यर्च्य स्वदक्षे भैरवान्त्रयं चक्रेश्वरं फडस्त्रेणा
भ्यर्च्य तत्र भैरवान्त्रये २ धर्माय नमः २ ज्ञा
नाय नमः २ वैराग्याय नमः २ ऐश्वर्याय नमः
इति गंधाक्षतैः संपूज्य वामतश्चक्रेश्वर्यां से

श्रा.भं.
पं
२२

योंसर्वयोगिनीगणेभ्योनमः इतिगंधाक्ष
तैरभ्यर्च्यसर्वान्‌तःचतुरस्रे सैाः सर्वविघ्नकृ
द्भ्योभूतेभ्यःस्वाहा तथोपरिचतुरस्रमभ्य
र्च्य क्षौंक्षीक्षेत्रपाल वटुकनाथायनमः इ
त्यग्रेक्षमावयेत्‌ ५ ततोदेवमशेषंकल्प
सर्वषडंगन्यासंविधायदेवींध्यात्वा मूलेन
मालासंस्कृत्य सर्वतद्राचम्यपाणायामंवि
धायविधिवत्जपंकुर्यात्‌ १ तत्रयथाशा
स्त्रजस्वा देवदेवीजपंसमर्प्य भवान्याःश्रे
कवचसहस्रनामस्तवपाठंकुर्यात्‌ तदपिस
र्शिवायैभवान्यैजपनामस्तवादीन्समर्प्य मू
लेनत्रिराचम्य गोपीलंगतदाणासन्तातेज
पे सिद्धिर्भवतुमेदेविलत्प्रसादान्महेश्वरि ।

इतिसशिवायैभवान्यैजपंसमर्प्यमूलेना
वलिंनिवेद्य ततःप्रातःप्रभृतिसायांतंसा
याद्युपासनंततः यत्करोमिजगन्मातस्त
देवतवपूजनम् इतिसांगंदेउवस्त्रभ
गिणसहमूलेनपुष्पाञ्जलित्रयंदत्वा सशि
वांभवानींसंहारमुद्रयास्वहृदिविसृज्य स्व
यमपिसदाशिवोभूत्वादेवीरूपयास्वश
क्त्यासहसर्वंविहरेदितिनित्यपूजापद्धतिः
इतिश्रीनित्यपूजायाःपद्धतिंगायत्रूपिंती
मेत्रयंचैकसर्वस्वंगोपयेत्परमेश्वरि ॥
इतिश्रीरुद्रयामलेतंत्रेश्रीभवानीनित्य
पूजापद्धतिःसमाप्तः ॥ ॐश्रीदेव्यैनमः
श्रीदेव्युवाच ॐदेवदेवजगन्नाथत्रैलो

श्रीभ॰ वे २४

कामभयदायकं भवान्याः कवचं ब्रूहि त्रि
षु लोकेषु दुर्लभं श्रीभैरव उवाच शृणु दे
वि प्रवक्ष्यामि भवानीकवचं परं विना ज्ञा
नान्न सिद्धिः स्यात्साधकस्य महेश्वरि तस्मा
च्छृणु महादेवि कवचं परमाद्भुतं शृणुया
त्पाठयेद्वापि पठते यश्च मानवः स प्राप्नो
ति धनं ज्ञानं नादुर्दिंश्च दर्शने ॐ अस्य श्री
भवानीकवचस्य श्रीभैरव ऋषिः अनुष्टु
प्छन्दः श्रीभवानी देवता श्रीभवानीप्री
त्यर्थे कवचपाठे विनियोगः ॐ ह्रीं श्रीं मे
शिरः पातु पाद्देवी ते मे करी सदा ललाटं पा
तु मे लक्ष्मीर्नेत्रे मे पातु सुंदरी श्रुती मे पा
तु भीमकंठं वै दानासा सदावतु विजया पा

तु मे गंडौ शुलिमे पातु चंडिका स्तनौ पातु
व वाग्देवी भुजौ मे पातु चंडिका हृदयं पा
तु मे तारा जठरं मे पातु तारिणी पार्श्वौ मे
पातु मातंगी नाभिं मे तोतलावतु शिश्नं मे
पातु सरस्वती गुह्यं श्रीउग्रकेश्वरी मेढ्रं मे दे
धारिका पातु कटिं मे पातु कालिका ऊरू
मे पातु वाराही जानू मे धारदावतु जंघे मे
शबला पायात् गुल्फौ श्रीउग्रकालिका पा तू
दौ मे सततं पातु देवी श्रीभद्रकालिका पाद
स्थले पादपृष्ठे पायान्मे त्रिपुरेश्वरी शिरसः
पादपर्यंतं भवानी पातु मे वपुः विस्मारितं
तु यत्स्थानं यत्स्थानं नामवर्जितं तत्सर्वं पातु
मे देवी भवानी भयनाशिनी सर्वमाते पा

श्या॰भ॰
पं
५५

तमोघोन्तामध्याह्नेकालरात्रिका ग्रवता।
द्वैमहामायारात्रौराजेसद्वीवन्न अर्धरात्रे।
जगन्मातानिशान्तेवमलास्वरवी राज्ञराज्ञे
श्वरीत्वंमेप्रवोधेयातमोषिषवा व्रजेनपा
तमेनित्यंदेवीत्रिपुरभैरवी रणेराजकु॰
लेद्यूतेविवादेयामुसंसदि भूतप्रेतपिशाचा॰
वेभ्रतेत्वंमापरमेश्वरी इतीदंकवचंदिव्य
त्रिषुलोकेषुदुर्लभं यत्रयत्रनइस्थंयस्य
कस्यनदीयते आयुंभयान्नीसर्वसंपत्ति
श्रीडल्पवर्धने सर्वापरायशमनेकीर्तिपु
त्रपनप्रदं पठनाद्धारणात्तस्यः सर्वोल्का॰
मान्लभेन्नरः गोप्यंगुप्ततरंसाक्षात्कलौनि॰
वीरदायके भवान्याःकवचंकृत्वायोपनी

यं सर्वथो निवृत्त् इति श्रीरुद्रयामले तंत्रे भ
वानीकवचं समाप्तम् ॥ ॥
ॐ नमो भवान्यैः ॐ यां खड्गत्रिशूलधारचा
पकरां त्रिनेत्रां तिग्मेतरांशुकलयां विका
सत्किरीटाम् सिंहस्थितां समस्ववरसिद्धसु
तां चतुर्भुजां शर्वाणि मां दुरितदुःखदरीं नमा
मि ॐ शुक्लजलपतन्ती चक्रमध्ये स्फु
रन्ती मधुरमधुपिवन्ती कंटकान्भक्षया
न्ती दुरितमपहरन्ती साधकं पोषयन्ती
जयतिजगति देवी [illegible] सुन्दरी कौउयन्ती सु
ॐ वन्दे भुजामेकवक्त्रां पूर्णेन्दुवदनप्रभाम्
खड्गां पाशान्वितः परां देवी वरदाभयपाणिकां
प्रेतसंस्थां महारौद्रीं भुजंगेनोपवीतिनीम्

भा॰भ॰
प
२९

भवानीकालसंहारबद्धश्रद्धाविभूषितां ज
गत्स्थितिकरीं ब्रह्मविष्णुरुद्रादिभिः स्तुतैः ।
स्तुतां तां परमेशानीं नौम्यहं विघ्नहारिणी
म् ॐ नमो भवान्यै कैलासशिखरे रम्ये देव
देवं महेश्वरम् ध्यानोपरतमासीनं प्रसन्न
मुखपंकजम् सुरासुरशिरोरत्नरंजितां
घ्रियुगं प्रभुं प्रणम्य शिरसा नंदी बद्धांजलि
रभाषत श्रीनन्दिकेश्वर उवाच देवदेव जग
न्नाथ संशयोस्ति महान्मम रहस्यमेक
मिच्छामि प्रष्टुं त्वां भक्तिवत्सल देवताया
याः कस्याः स्तोत्रमेतद्दिवानिशं पठसे विरं
नाथ त्वमतः किमपरं परः इति पृष्टस्तदा दे
वो नन्दिकेन जगद्गुरुः प्रोवाच भगवानेको

विकसन्नेत्रपंकजः श्रीभगवानुवाच सा
धु साधु गणाध्यक्ष पृष्टवानसि मां च यत् स्कं
दस्यापि च यद्गोप्यं रहस्यं कथयामि तत् पु
राकल्पक्षये लोकान्सिसृक्षुर्दृढचेतनः गु
णत्रयमयीं शक्तिं मूलप्रकृतिसंज्ञितां ता
स्यामहं समुत्पन्नस्तत्त्वैस्तैर्महदादिभिः चेत
नेतिन्नतः शक्तिर्मां काप्यालिंगयनस्थुषी दे
नः संकल्पजालस्य मनोधिष्ठायिनी शुभा
रश्मेति परमं शक्तिकन्निमीलनतः परं न
नोवाक्षितिविख्याता शक्तिशाह्नमयीश्वरा
माउरासीज्जगन्माता वेदमाता सरस्वती अ
ल्मीच वैष्णवी रौद्री कौमारी पार्वती शिवा
सिद्धिदा बुद्धिदा यांना सर्वमंगलदायिनी न

श्राभ
पं
२७

५७

यैतत्सृज्यते विश्वमनाधारं च धार्यते तयैा
तन्याल्पते सर्वं तस्यामेव प्रलीयते अचिन्ता
प्रमाणातीता ध्याता सर्वभावविनिश्चितैः आरा
धिता स्तुता सैव सर्वसिद्धिप्रदायिनी तस्या
अनुग्रहाद्देवतामेव स्तुतवानहम् सहस्रै
र्नामभिर्दिव्यैस्त्रैलोकैर्गीतिहृजितैः स्तवे
नानेन सन्तुष्टामामेव प्रविवेशासा तदाया
स्य मया प्राप्तमैश्वर्यं पदमुत्तमम् तत्प्रसा
दान्मया सृष्टं जगदेतच्चराचरम् ससुरासु
रं सगन्धर्वं यक्षराक्षसमानवम् सपन्नगं स
समुद्रं सशैलवनकाननम् सराशिग्रह
नक्षत्रं पंचभूतगुणान्वितम् नन्दिर्नामा
सहस्रेणास्तवेनानेन सर्वदा स्तवेपरापः

रांशाक्तिमेमातृग्रहकाविलीम् इत्युक्तोपर
तंदेवंचराचरगुरुंविभुम् प्रणम्यशिरसा
नंदीशोवाचपरमेश्वरम् श्रीनन्दिकेश्वरउ
वाच भगवन्देवदेवेशलोकनाथजगत्पते
भक्तोस्मितवदासोस्मिप्रसादःक्रियतांमयि
देव्यास्तवमिमंपुण्यंदुर्लभंयत्सुरैरपि श्रो
तुमिच्छाम्यहंदेवप्रभावमपिचास्यतत् श्रीभ
गवानुवाच शृणुवत्सनन्दिन्महाभावस्तवराज
मिमंशुभम् सहस्रैर्नामभिर्दिव्यैःसिद्धिदंसु
खमोक्षदं शुचिभिःप्रातरुत्थायपठितव्यंस
माहितैः त्रिकालंश्रद्धयायुक्तैर्नातःपरतर
स्तवः ॥ अस्यश्रीभगवतीभवानीनामस
हस्रस्तवराजस्य श्रीभगवान्महादेवऋषिः

श्रा·भ·
पं·
२८

मायाशक्तिः श्रीभगवती भवानी देवता अ
नुष्टुप् छंदः श्रीदेवीप्रीत्यर्थे भवानीनाम
सहस्रस्तवराजपाठे विनियोगः अथ ध्यानं
ॐ बालार्कमंडलाभासां चतुर्बाहुं त्रिलोचनां
पाशांकुशवराभीतीं धारयंतीं शिवां भजे ॥
ॐ अर्धेंदुमौलिममलाममराभिवंद्यामंभो
जपाशांकुशरक्तकपालहस्तां रक्तांगराग
रशनाभरणां त्रिनेत्रां ध्यायेच्छिवस्य वनिता
मधुविह्वलांगीम् श्रीईश्वर उवाच ॐ महा
विद्या जगन्माता महालक्ष्मी शिवप्रिया विष्णु
माया शुभा शांता सिद्धा सिद्धसरस्वती क्षमा
कांतिः प्रभा ज्योत्स्ना पार्वती सर्वमंगला हिंगु
ला चंडिका दांता पद्मा लक्ष्मी हरिप्रिया त्रिपुरा

नंदिनीनंदासंनंदासुरवन्दिता यज्ञवि
द्यामहामायावेदमातास्वधाधृतिः प्रीति
श्रियाप्रसिद्धाचमृडानीविन्ध्यवासिनी सि
द्धविद्यामहाशक्तिःपृथ्वीनारदसेविता पुरु
हूतप्रियाकांताकामिनीपद्मलोचना प्रह्ला
दिनीमहामातादुर्गादुर्गतिनाशिनी ज्वाला
मुखीसुगोत्राचज्योतिःकुमुदहासिनी दुर्ग
मादुर्लभाविद्यास्वर्गतिःपुरवासिनी अप
र्णाशांभरीमायामदिरामृदुहासिनी कुल
वागीश्वरीनित्यानित्यक्लिन्नाकृशोदरी का
मेश्वरीचनीलाचभीरुंडावह्निवासिनी लंबो
दरीमहाकालीविद्याविद्येश्वरीतथा नरेश्व
रीचसत्याचसर्वसौभाग्यवर्धिनी संकर्षि

श्राभ· पं २९

29

णीनारसिंहीवैस्नवीचमहोदरी कात्याय
नीचवेपावसर्वसंपत्तिकारिणी नारायणी
महानिद्रायोगनिद्राप्रभावती प्रज्ञापारमि
ताप्रज्ञातारामधुमतीमधु क्षीरार्णववा
यास्वाहाकालिकासिंहवाहना ॐकाराव
स्वधाकारावेनताकोपनाकृतिः अर्धविंदु
धराधीराविश्वमाताकलावती पद्मावती
स्ववक्षाचप्रज्ञाचसरस्वती ॐउर्मिनाज्ञा
गङ्गाचीवृडमानाज्ञेनेश्वरी जिनमानाज्ञिने
त्राचशारदादेसवाहना रात्रलक्ष्मीवषट्
काराःस्वधाकारास्वधात्मिका राजनीतिस्त्व
यीवार्तादंडनीतिःक्रियावतीः सद्भूतिस्तारि
णीश्रद्धासङ्गतिःसत्यपरायणा सिन्धुर्मंदाकि

वीगंगायमुनाचसरस्वती गोदावरीविपा
शाचकावेरीचशतद्रू सरयूःचंद्रभागा
चकौशिकीगंडकीशुचिः नर्मदाकर्मनाशा
चर्मण्वत्यश्चदेविका वेत्रवतीवितस्ताच
वरदानरवाहना सतीपतिव्रतासाध्वीस्व
च्छंदवासिनी एकवस्त्राःसहस्राक्षीस्व
श्रोणिर्भग्नमालिनी सेनाश्रेणिः पताकाचस
हस्राक्षकोटिलिनी पताकिनीदयारंभावि
पंचीपंचमप्रिया परापरकलाकांतात्रिश
क्तिःमोक्षदायिनी ऐंद्रीमाहेश्वरीब्राह्मीकौ
मारीजलवासिनी इच्छाभगवतीशाकिःका
मधेनुःकृपावती । वज्रायुधावज्रहस्ताचंडी ।
चंडपराक्रमा गौरीस्वर्णवर्णाचस्थिति ।

श्रा॰ भं॰
प
३॰

30

संहारकारिणी एकानेकामहेश्याचशाना
वाहुर्महाभुजा भुजंगभूषणा भूषा षट्च
क्रक्रमवासिनी षट्चक्रभेदिनी स्थूलाकाया सा
स्याकायवर्जिता स्वस्मिता स्वश्रवीत्स्यामा
मूलप्रकृतिरीश्वरी अजाचबहुवर्णाचशुक्र
वार्थप्रवर्तिनी रक्तानीलासिताश्यामाकृ
ष्णापीताचकर्बुरा त्वथात्स्माजरारूढानक
णीकरुणालया कलाकाष्ठामुहूर्ताचनि
मेषाकालरूपिणी स्वकर्णा रसनानासाचा
त्वस्पर्शवतीरसा गंधप्रिया सुगन्धाचसु
स्पर्शाचमनोगतिः मृगनाभिर्मृगाक्षीचक
र्पूरामोददारिणी पद्मयोनिस्वकेशीचसुर
लिंगाभगरूपिणी योनिमुद्रामहामुद्राखे

वरीखगगामिनी मधुश्रीर्माधवीवल्ली
मधुमत्तामदोद्धता मातंगीशुकहस्ता च
पुष्पबाणेक्षुचापिनी रक्तांबरधराक्षीबार
क्तपुष्पावतंसिनी शुभ्राम्बरधराधीराम
हाश्वेतावसुप्रिया सुवेणीपद्महस्ता च मु
क्ताहारविभूषणा कर्पूरामोदनिःश्वासा
पद्मिनीपद्ममंदिरा खड्गिनीचक्रहस्ता च भु
शुण्डीपरिघायुधा चापिनीपाशहस्ता च त्रि
शूलवरधारिणी सुबाणाशक्तिहस्ता च
मयूरवरवाहना वरायुधधरावीरावीर
पानमदोत्कटा वसुधावसुधारा च जया
शाकम्भरीशिवा विजया च जयन्ती च सु
स्तनीशत्रुनाशिनी अन्तर्वत्नीवेदशक्तिः

श्या॰भ॰
प॰
३१

31

वरदाभयधारिणी पीनस्तना च सुपीनस्तना च
बालग्रहविनाशिनी कुमारी च स्वयंभा च
कामाख्या कामवैरिता जालंधरपथानंदना का
मरूपनिवासिनी कामबीजवती सत्या स
त्यधर्मपरायणा स्थूलमार्गस्थिता सूक्ष्मा सू
क्ष्मबुद्धिप्रबोधिनी षट्कोणा च त्रिकोणा च त्रिने
त्रा त्रिपुरसुंदरी वृषप्रिया वृषारूढा महि
षासुरघातिनी शुंभदर्पहरा दीप्ता दीप्तपा
वकसन्निभा कपालभूषणा काली कपा
लमालाधारिणी कपालकुंडला दीर्घा शि
वदूती घनध्वनिः सिद्धिदा बुद्धिदा नित्या स
त्यमार्गप्रबोधिनी कंबुग्रीवा वसुमती छ
त्रच्छायाकृतालया जगद्गर्भा कुंडलिनी भुज

गाकारधारिणी ॐ ह्ल सत्त्वमयप्राचनाभि
नालमस्तकालिनी मूलाधारनिराकारावह्नि
कुंडलिकृतलिया वायुकुंडस्वरवासीनानिराधा
रानिराश्रया श्वासोच्छ्वासगतिर्जीवाग्राहि
णीवह्निसंश्रया वह्नीतत्त्वसमुत्पन्नानाथश्रीः
सासादलोलुपा तपस्विनीतपःसिद्धिस्तपःसि
सिद्धिदायिनी तपोनिष्ठानपोषणातापा
सीचतपोप्रिया सप्तधानमयीमूर्तिसप्तधा
त्वन्तराश्रया देहपुष्टिर्मनःपुष्टिरन्नपुष्टिः
वलोद्भवा ॐ औषधिर्वैधमानाचद्रव्याशक्ति
प्रभाविनी वैद्या वैद्यचिकित्साच स्वपथ्यारो
गनाशिनी मृगयामृगमांसादामृगत्वङ्मृ
गलोचना वागुराबंधरूपा च वधरूपावधो

श्रा॰भ॰
प॰
३२

हसा वेदीवन्दिस्तनाकाराकारावेधविमो
चिनी ॐ खलालखुद्राविद्याहफवेधविमो
चिनी ॐ विकावालिकाचोवास्ता साभ्रजेना
चिता कैलिकीकलविद्याचस्वकलाकलश
जिता कालचक्रभ्रमाभ्रंमाविभ्रमाभ्रमनाशि
नी वात्याली मेघमाला च स्वच्छाङ्किसमस्वर्यि
नी अकारा च इकारा च उकारैकाररूपिणी
ह्रींकारीबीजरूपा च ह्लींकाराम्बरवासिनी
सर्वाक्षरमयी मूर्तिरक्षरावली मालिनी सिंदू
रारुणवर्णा च सिन्दूरतिलकाप्रिया वंश्या
वंश्यपबीजा च लोकवश्यविभाविनी नृप
वश्या नृपसेव्या नृपवश्यकरी प्रिया महि
षी नृपमान्या च नृप्या नृपानन्दपवेदिनी नृप

32

धर्ममयी धन्या धनधान्यविवर्धिनी चतुर्व
र्गमयी मूर्तिश्चतुर्वर्गौघसूजिता सर्वध
र्ममयी सिद्धिश्चतुराश्रमवासिनी ब्राह्मणी
त्रियी वैश्या शूद्राश्चवरवर्णजा वेदमार्ग
रता यज्ञा वेदविश्वविभाविनी अस्त्रशस्त्र
मयी विद्या वरशस्त्रास्त्रधारिणी सुमेधाः स
त्यमेधा च भद्रकाल्यपराजिता गायत्री स
त्कृतिः संध्या सावित्री त्रिपदाश्रया त्रिसंध्या
त्रिपदी धात्री सुपर्वा सामगायनी पंचाली
बालिका बाला बालक्रीडा सनातनी गर्भा
धारधरा शून्या गर्भाशयनिवासिनी सुरारि
घातिनी कृत्या पूतना च तिलोत्तमा लज्जा रस
वती नंदा भवानी पापनाशिनी पट्टांबरध

भा
प
३३

श्रा.भ.
प
३३

परागीती स्वगीतिज्ञानलोचना समस्वरम
यीतंत्रीः षड्जमध्यमदैवता मूर्छनाग्राम
संस्थानीस्वरच्छस्वरस्थानवासिनी अट्टाट्टहा
सिनी प्रेताप्रेतासननिवासिनी गीतनृत्त
प्रियाकामानन्दप्रदा तुष्टिदातया निःस्सा
स्वप्रियाप्रज्ञालोकेपीवसर्वोत्तमा स्वविषा
ज्वालिनीज्वालाविषमोहार्तिनाशिनी विषारि
नागदमनी कुरुकुल्लाम्लतोद्भवा भूतभीति
हरनिलाभूतावेशविनाशिनी रक्षोघ्नीराक्ष
सीराक्षीः दीर्घनिद्रादिवागतिः वेदिकाचंदि
कानिम्नसूर्यकांतिनिशाचरी डाकिनीशा
किनीयोग्याहाकिनीचक्रवाकिनी सितासि
ताप्रियासंग्रामासङ्कलावनदेवता गुरुरूपा

धरागुर्वीन्द्रस्तंभोरीविशारदा महामारी
विनिद्राचतन्द्रामृत्युविनाशनी चंद्रमंडल
संकाशाचंद्रमंडलवासिनी अणिमादिगु
णोपेतानास्पृहाकामरूपिणी अष्टसिद्धिप्र
दाप्रौढादुष्टदानवघातिनी अनादिनिध
नापुष्टिश्चतुर्वाहुश्चतुर्मुखी चतुःसमुद्रा
शयनाचतुर्वर्गफलप्रदा काशापुरस्थली
काशाशावरवक्षस्थलोचना भूतानामभया भा
विद्याचशैलजाशैलवासिनी वाममार्ग
रतावामाशिववामांगवासिनी वामाचार
प्रियातुष्टिलोपामुद्राप्रबोधिनी भूतात्मा
परमात्माचभूतभावविभाविनी मंगला
चसुशीलाचपरमार्थप्रबोधिका दक्षिणा

ग्रा.भं.
प
३५

34

दक्षिणामूर्तिः स्वदक्षिणा हरिप्रिया योगिनी
योगयुक्ता च योगांगा ध्यानशालिनी योगप
ट्टधरा मुक्ता मुक्तानां परमा गतिः नारसिंही
स्वजन्मा च त्रिवर्गफलदायिनी धर्मदा धन
दा चैव कामदा मोक्षद्युतिः साक्षिणी क्ष
णदा दक्षा दक्षजा कोटिरूपिणी क्रतुः कात्याय
नी स्वच्छा स्वच्छंदा च कविप्रिया सत्यागमा ब
हिःस्था च काव्यशक्तिः कवित्वदा मेनापुत्री स
ती मेना मैनाकभगिनी तडित् सौदामिनी
स्वधामा च स्वधा मा धामशालिनी सौभाग्यदा
यिनी द्यौश्च सुभगा द्युतिवर्धिनी श्रीः कृत्तिव
सना चैव कंकाली कलनाशिनी रक्तबीज
वधोद्दामा स्वतन्त्रबीजसन्ततिः जगज्जीवा ज

गह्वीजाजगद्बयद्दिनैविशी चामीकररु
चिस्मात्वी सात्वयाषोडशीकला यत्तत्पदाउ
वेपावबधद्दितिणीधनदार्चिता चित्रिणीचित्र
मायाचविचित्राभुवनेश्वरी चामुंडाशंकर
म्लाचचंडमुंडवडेडरा अष्टमीकादशीपू
र्णानवमीचचतुर्दशी अमाकलशादस्ला
चतुर्णाकुंभपयोधरा अभीरुभैरवीभीरा
भीमात्रिपुरभैरवी महासंहारवीरीवम
हाभैरवपूजिता निर्मुंडाहस्तिनीचंडाक
रालदशनानना करालाविकरालाचघो
रघुर्घुरनादिनी रक्तदन्तोर्ध्वकेशीचबंधू
कजकमालाकरणा कादम्बरीपटासाचका
मसीर्कुंजमप्रिया संसिबंदूस्वर्गगाचर

श्री भ॰
प
३५

35

तिवाहस्सवरोदा मातंगिनीवरारोहामत्ता
मातंगगामिनी हंसा हंसगतिर्हंसी हंसो
ज्वलशिरोरुहा पूर्णचंद्रमुखी श्यामासिता
स्या श्यामकुंडला मषीवलेखिनीलेखा सुले
खालेखकप्रिया शंखिनीशंखहस्ता च जलस्
स्था जलदेवता कुरुक्षेत्रावनिः काशी मथुरा
कांच्यवंतिका अयोध्या द्वारिका माया तीर्था
तीर्थकरप्रिया त्रिपुष्कराप्रमेया च कोशस्था
कोशवासिनी कौशिकी च कुशावर्ता कौशां
बी कोशवर्धिनी कोशदा पद्मकोशाक्षी कुसु
म्भकुसुमप्रिया तोतला च तुला कोटिकूटा
स्था कोटराश्रया स्वयंभूश्च स्वरूपाश्च स्वरूपा
रूपवर्धिनी तेजस्विनी सुभिक्षा च बलदा ।

बलदायिनी महाकोशी महावर्त्तीर्जुहिः स
दसदात्मिका महाशङ्करासौम्या विशोका
शोकनाशिनी सात्विकी सत्वसंस्था च राजसी
च रजोवृता तामसी च तमोयुक्ता गुणत्रय
विभाविनी अव्यक्ता व्यक्तरूपा च वेदविद्या च
कँ शांभवी शंकरकल्पाविनी कल्पा मनःसंक
ल्पसन्ततिः सर्वलोकमयी शक्तिः सर्वश्रव
णगोचरा सर्वज्ञानवती वांछा सर्वतत्वावबो
धिनी जाग्रतिश्च सुषुप्तिश्च स्वप्नावस्था तुरीय
का त्वरा मन्दगतिर्मन्दा मदिरामोददायिनी
पानभूमिः पानपात्रा पानदानकरोद्यता ।
घूर्णारुणनेत्रा च किंचिदव्यक्तभाषिणी
आशापूरा च दीक्षा च दक्षा दीक्षितपूजिता

शा॰ अं॰
पं
३९

36

नागवल्ली नागकन्या भोगिनी भोगवल्लभा
सर्वशास्त्रवती विद्या सुस्मृतिर्धर्मवादिनी ।
श्रुतिस्मृतिपरा ज्येष्ठा श्रेष्ठा पातालवासिनी
मीमांसा तर्कविद्या च सुभक्तिर्भक्तवत्सला
सुनाभिर्यातनाजातिर्गम्भीरा भाववर्जिता ना-
गपाशधरा मूर्तिरगाधा नागकुण्डला सुच-
क्रा चक्रमध्यस्था चक्रकोणनिवासिनी सर्व-
मन्त्रमयी विद्या सर्वमन्त्राक्षरावलिः मधुश्र-
वा स्रवन्ती च भ्रामरी भ्रमरालिका मातृमं-
डलमध्यस्था मातृमंडलवासिनी कुमार-
जननी क्रूरा सुमुखी ज्वरनाशिनी अतीना-
विद्यमाना च भाविनी प्रीतिमंजरी सर्वसौ-
ख्यवती युक्तिराहारपरिणामिनी निधानं पं-

वभूतानां भवसागरतारिणी अक्रूरावश
द्रवती विग्रहाय द्रवर्जिता रोहिणी भूमिग
र्भा च कालं भूः कालवर्तिनी कलंकरहि
ता नारी चतुष्षष्ट्यभिधावती जीर्णा च जी
र्णवस्त्रा च नूतनानवल्लभा अजरा स्त्र
ति प्रीतिरतिरागविवर्धिनी पंचवातगति
र्भिन्ना पंचश्लेष्माशयाधरा पंचपित्तवती
शक्तिः पंचस्थानविबोधिनी ऋतुमतीका
मवती वह्निस्वच्छवनेच्छा रजःशुक्रधराश
क्तिर्जरायुर्गर्भधारिणी त्रिकालज्ञा त्रिलिं
त्री गा त्रिमूर्तिस्त्रिपुरवासिनी अरागा शिवतत्त्वा
च कामतत्त्वानुरागिणी प्राच्यवाचि प्रतीची
दिग् उदीची दिग्विदिग्दिशा अहंकृतिरहंका

ग्राभ.
प
३७

37

गावलिमायावलिप्रिया स्वकृत्त्ववासामि
येमीचमग्रुहाश्राद्धदेवता मातामातामः
हीन्टमीपितृमातापितामही स्नुषादौहि
त्रिणीपौत्रोडीन मौषीम्हप्रिया स्तनदास
नपानाचविस्मयोनिस्तनन्यपा शिशूत्संग
धरादोलादोलाक्रीडाभिनन्दिनी उर्वशी
कदलीकेकाविशिखाशिखिनर्तिनी खड्ग
गमारिरिक्षिखड्गबाणाङ्कवातवर्तिनी ला
ङ्गपाशिकरालम्बालम्बाचम्पभलवत्तणा व
र्तिनीरूपचाचावापरिवाचर्चविनिर्हर्ती आ
कारवलयावेलामयीदाचमहोदधी पोष
णीशोषणीशाकिःदीर्घकौशीखलोमधा
ललितामामाताततेनीवेदवेदांगधारिणी ।

ला

नराख्यकारणामहामाचनरंत्रुडास्थिभूषणा
श्रुतक्रीडारतिर्गौरीशारिकाशुकभाषिणी
शाम्भवीगारुडीविद्यावारुणीवरुणार्चि
ता वाराहीतुंडहस्ताचदंष्ट्रोद्धृतवसुंदरा मी
नमूर्तिर्धरामूर्तिर्वदान्याप्रतिमाश्रया अ
मूर्त्तिर्निधेयाचसालिग्रामशिलाशुचि
स्मृतिसंस्काररूपाचसुसंस्काराचसंस्कृति
प्राकृतादेशभाषाचगाथागीतिःप्रहेलिका
इडाचपिंगलापिंगासुषुम्नासूर्यवाहिनी
शशिस्रवाचतालुस्थाकाकिनीमृतजीवि
नी अणुरूपाबृहद्रूपालघुरूपागुरुःस्थिरा
स्थावराजंगमादेवीकृतकर्मफलप्रदा ।
विषयाक्रांतदेहाचनिर्विशेषाजितेन्द्रिया

श्या.भ.
प
५८
३८

विश्वरूपा चिदानंदा परब्रह्मप्रबोधिनी नि
र्विकारा च निर्वैरा विरतिः सत्यवर्धिनी पु
रुषाज्ञानभिन्ना च क्लांति कैवल्यदायिनी ।
विविक्तसेविनी प्रज्ञाजननीयश्रीबहुश्रुतिः
निरीहा च समस्तैका सर्वलोकैकसेविता
सेवासेर्वप्रिया सेव्या सेवाफलविवर्धिनी
कलौ कल्किप्रिया काली दुष्टम्लेच्छविनाशि
नी प्रत्यंचा च धनुर्यष्टिः खड्गधारा दुरानतिः
अश्वप्लुतिश्च वल्गा च सृणिः सन्मत्तवारणा
वीरभूर्वीरमाता च वीरसूर्वीरनंदिनी जय
श्रीर्जयदीक्षा च जयदा जयवर्धिनी सौभा
ग्यसुभगाकारा सर्वसौभाग्यवर्धिनी क्षेमं
करी सिद्धिरूपा सत्कीर्तिः पथिदेवता सर्व

तीर्थमयी मूर्तिः सर्वदेवमयी प्रभा सर्वसि
द्धिप्रदा शक्तिः सर्वमंगलमंगला सर्वमंग
लमंगल्ये शिवे सर्वार्थसाधके शरण्ये त्र्य
म्बके गौरि नारायणि नमोस्तु ते ॥ १० ॥ नमो
नमः श्रुतं सहस्रनामेदमम्बाया रुद्र
भाषितं चतुर्वर्गप्रदं सत्यं नन्दिकेन प्रका
शितं नातः परतरो मंत्रो नातः परतरस्स्ता
वः नातः परतरा विद्या तीर्थं नातः परं परं
ते धन्याः कृतपुण्यास्ते एव भुवि पूजिताः
एकभावं सदा नित्यं येर्चयंति महेश्वरीं
देवतानां देवता या ब्रह्माद्यैर्याश्च पूजिताः
भूयात्सा वरदा लोके साधूनां विश्वमंगला
एतामेव पराराध्यां विद्यां त्रिपुरभैरवीं त्रै।

भ्रा.भ. लोकसमोहिनीदेवीमा काषीद्भगवान्हरिः
प इतिश्रीरुद्रयामलेतंत्रेनन्दिकेश्वरसंवा
२१ देभवानीनामसहस्रंसमाप्तम ॥ ॥
39 ॐनमोभवान्यैः

भैरवउवाच गे

शृणुदेविप्रवक्ष्यामिभवान्याःस्तोत्रराजकं
मूलमंत्रमयंदिव्यंसर्वसिद्धिप्रदंकलौ स
र्वसारमयंदेविसर्वतंत्रेषुगोपितं रहस्य
ममदेवेशिसर्वस्वंत्रिदिवौकसां स्तोत्ररा
जमहादेविश्रुत्वागोप्यतमंकुरु स्तोत्ररा
जस्यदेवेशिऋषिःश्रीमान्सदाशिवः छंदो
ऽनुष्टुप्देवताचभवानीतिनवेश्वरी माया
बीजंरमाशक्तिःहूंचैकीलकमीश्वरि सका

लाभीष्टसिद्ध्यर्थे विनियोगः इति स्मृतः ॥ अ
स्य श्रीभवानीस्तोत्रराजस्य सदाशिव ऋ
षिः अनुष्टुप् छंदः श्रीभवानी देवता ह्रीं
बीजं श्रीं शक्तिः क्लीं कीलकं सकलाभी
ष्टसिद्ध्यर्थे पाठे विनियोगः ॥ अथ ध्यानम्
उद्यदिंदुवदनां चतुर्भुजैस्त्रिनेत्रैश्च कमला॰
शुचिस्मितां खड्गशक्तिवरदाभयांकितां॰
प्रेतगां हृदि भजामि भवानीम् इति ध्यान
म् तारं बीजं मायावर्णं तं जपेद्यः प्रीतः सेंदुबिं
दुविभ्राजमानं स स्वां मापीनवतोजमा॰
ध्यायते मंत्री मायमूर्तिस्त्रिरूपः लक्ष्मीबी
जं बिंदुचंद्रार्धखंडं मंत्री प्रातर्यो जपेत्स्मान
साक्षे स्पष्टानाभू हकवती पावकज्ञाग्रका

ग्रा॰भं॰
व
५॰

भोगोमक्षातिथामत्वदीयेमावीजंघःस्ताय
कस्लेनत्तीयेमध्याह्नेवासेन्नयेदर्थराग्रे दा
रिङ्गोन स्तस्यलस्मीःप्रसन्नाभूयाद्देविवत्व
सादामृतदा+ ग्रासांतियेदेविमंत्रीभवात्या
मंत्रंदिव्यंध्यायतेवाजयेद्दागीर्वाण्यास्तत्से
षांकिंच्हूज्जयंतिस्लाग्रैदिव्येमोगधाःसंस्त्रा
वेत्ति मंत्रंवीजंदेविमंत्रस्तमध्येकामानी
वोध्यायतेस्वमरोजे नसस्वेवंमेनकायो
वेषीवांभावापित्स्वर्गतोयातिप्रपम् ५
मायावीजंसायकस्लेस्त्वेघःस्तायंदेविग्र
मध्यविभावः जिस्वाभूमिषगाघ्नंतीसाग
रांतोऽज्योऽद्याजंविसुवद्धिस्ततस्त्वः रैवीजा
रांदेविविदृर्घंचंद्रंस्त्रैकंमंत्रीचिंतयेत्साथ

कैन्द्रैः दिक्षुमातङ्गमत्तैर्वीज्यमानो याति ॥ सगि
स्वर्लोके किन्नरैः स्तूयमानः ७ रुक्मिणापतौ
बीजमीशं त्वदीयं ध्यायेद्योऽनन्तदेवि मन्त्रो रम
णोऽते ब्रह्मा विश्वजित्सरीघोपि नस्य वेपथः
स्वर्गः किं त्रानः स्वइलोकः ८ त्वन्मन्त्रं येना
मम्मेंत्रं भवानि ध्यायेद्देवि ध्यात्मकेविश्वम
नः जित्वा शत्रून्लिं दुन्तलोका मद्येज्जो भूयात्स
योभूस्ततो सार्वभौमः ९ क्लींबंवह्नीवृपश्र
युक्तं शाके दीर्घं भूतं देवि मन्त्रीजपेद्यः तस्य
मेरौ भोजनद्रव्ये समस्तावपुषः श्रुभोः स्वत
नेक्षिद्धयोषो १० बीजं ध्यायेद्योऽरकेयोऽसः
देवि त्वन्मन्त्रां ते सर्वमेवैकरूपे तद्द्वात्के
मत्ययैकैकरूपा वासंज्ञयोद्वारत्नीसाय

श्राभ॰ षं॰ ष॰ ता ॥ मंत्रांते योदेवि वीजं वतस्य प्राप्येदं तया

साधकैः सुकृचेताः विन्नेशा ह्वा शौर्यवान्वा

भजा र्यवाश्च कामी भोगी रूपवान्नायते मः ११ स

शिवां शिवा विष्णरोपविष्णां पविहल्लीं दुर्गा

र्वां त्रिलोचनां वरदाभयखड्गशक्तिहस्ता

भजे स्यदिश्री चक्रगतां भवानी १२ लोकितना

गपत्र वरखड्गत्र स्थविलसच्छमविंदु पीठ्य

दिवेदाश्च खड्गपीद साधकोरिश्च सदासिद्ध

शिवागेहेत्वाये यावोलयभूमिश्च १४ ...

मिश्राउयायोमसध्यान्हतथैववाप्तिपीत्य

केसभवतिपतपलोभूमौदिवीदत्त वृ

मवयेत्तासदितेभवनीनिष्कसांयाश्चतिये

स्यदिशिवे सभवेद्विषीदः १५ इतिस्तोत्रे

मन्त्रमयं त्रांपमूलैकसाधनं त्रिवर्गका
लदं दिव्यं सर्वतन्त्रेषु गोपितं ९ भवान्या
देवि सर्वस्वं रहस्यं मम पार्वति यः पठेच्छ्र
द्धया चापि तस्य मुक्तिः करे स्थितः १० ॥
इति श्रीरुद्रयामले तन्त्रे महारहस्ये श्रीभ
वानीपंचांगे समाप्तम् ॥ ॥ शुभमस्तु
स्तु सर्वजगताम्

ग्र.म
व
४४

श्रायाभवानी
पं.
श्राधां नैद॥